Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2023 GISRRJ | Volume 6 | Issue 4 | ISSN : 2582-0095

# जयभारतादर्शे वीरसन्देशः

शुभो वनिक्
शोधच्छात्रः , राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**Article Info**
Volume 6, Issue 4
Page Number : 05-10

**Publication Issue :**
July-August-2023

**Article History**
Accepted : 01 July 2023
Published : 15 July 2023

**सारांशः** – गद्य-पद्ययोः मिश्रशैल्याः निदर्शनं वैदिककालादारभ्य आधुनिककालपर्यन्तं निरन्तरं प्रवहमानं वर्तते। तदनुगुणं बहुविधचम्पूकाव्यानां विरचनम् अद्यावधि क्रियमाणमस्ति। आधुनिकसमये तस्य न्यूनास्तित्वेऽपि परम्परा अविच्छिन्ना अस्ति। एवमेव आधुनिककविना विद्वन्मूर्धन्येन श्रीफाल्गुनगोस्वामिना विरचिता जयभारतादर्शचम्पूः अभिनवसंस्कृतसाहित्यस्य अद्वितीयम् ऐतिहासिकं चम्पूकाव्यमस्ति। यद्यपि स्वदेशस्य मातृभूमेश्च कृते प्राणोत्सर्जनकारिणां वीराणां गाथामवलम्व्य काव्यरचना राजस्थानस्य साहित्यिकी परम्परास्ति। तदनुरूपमेव कविः चम्पूकाव्येऽस्मिन् भारतवीराणाम् देशभक्तेः आत्मबलिदानस्य च प्रबन्धकल्पनां सजीवचित्रणैः अचिचित्रित्। भारत-पाकिस्तानयोर्मध्ये सीमाविवादात् उद्भूतः संघर्षः अस्य जयभारतादर्शचम्पूकाव्यस्य प्रधानविषयः विद्यते। काव्यस्यास्य कथावस्तु मेजर् सीतारामचौधुरी इत्यनेन विरचितं पुस्तकं **भारत-पाक संघर्ष** तथा विभिन्नसमाचारपत्रेषु प्रकाशितं युद्धवृत्तान्ताधारितं वर्तते। भारतस्योपरि चीनस्य विश्वासघातपूर्णम् आक्रमणम् एवंञ्च भारतीयप्रदेशेषु पाकिस्तानस्य गृध्रदृष्टिकारणात् समुत्पन्नानेकप्रकाराणां संघर्षाणां वर्णनं काव्यमय्या शैल्या कविनात्र गुम्फितम्। अष्टादशपर्वसु विरचितस्यास्य चम्पूकाव्यस्य अनुशासननाम्नि पर्वणि फाल्गुनमहोदयः अस्माकं वीराणां गर्वोद्दीपितैः शब्दैः प्रकृतिचित्रणैश्च तेषां सन्देशान् अस्माकं आधुनिकभारतनिर्मातॄणां कृते अयच्छत्।

**विशेषशब्दाः**:- चम्पूकाव्यम्, वीर-भारतसिंहस्य वर्णदूतम्, वीरस्य स्वदयितायै वर्णदूतम्, वीरसुखवीरसिंहस्य पत्रम्, भारतस्य शौर्यपरम्परा इत्यादयः।

चम्पूकाव्यस्य कृत्रिमतायाः मूलरूपं समुद्रगुप्तस्य दिग्विजयप्रशस्ति-वर्णने (350 क्रैस्ताब्दे) स्पष्टमवलोक्यते, यत्र कविवरहरिषेणः गद्य-पद्यमयस्वकीये प्रशस्तिकाव्ये रस-भाव-गुणालंकार-कला-चातुर्यादीन् सञ्चारयन् सहृदयान् चमत्करोति। नूनमियं प्रशस्तिः चम्पूकाव्यस्य पूर्वपीठिका। एतत्परम् कविता-कामिनीपञ्चबाणेन, महादण्डधारिणा दण्डिना वा, न जाने किमर्थम् चम्पूलतां तिरस्कृत्य कल्पतरुरिव गद्यतरुरेव समादृतः। उपलब्धासु चम्पूरचनासु महाकवित्रिविक्रमभट्टस्य नलचम्पूरेव प्रथमा कृतिरिति मन्यते ऐतिहासिकैः। चम्पूकाव्यलक्षणसंयुता सर्वाद्या कृतिः यत्र गद्यपद्ययोः प्रभूतप्रयोगः दृश्यते, आचार्यनिर्दिष्टलक्षणानुरूपं साङ्कैः तथोच्छ्वासैश्च विभक्तास्ति, सा भवति त्रिविक्रमभट्टस्य रचिता नलचम्पूः अथवा

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

दमयन्तीकथा। आचार्यद्विवेद्यनुसारं[1] अद्यावधि उपलब्धसाहित्याधारेण एतद्वक्तुं शक्यते यत् नलचम्प्वा: रचयिता त्रिविक्रमभट्ट एव सर्वप्रथम: काव्यरूपेण अस्या: पद्धत्या: प्रवर्तक: अस्ति। त्रिविक्रमभट्ट: विदर्भाभिजन: शाण्डिल्यगोत्रीय: श्रीधरपौत्र: देवादित्य-तनूज: कविचक्रवर्ती त्रिविक्रमभट्ट: खिस्टीयदशमशतकपूर्वार्द्धे प्राय: 615 खिष्टाब्दे जायमान: गद्यपद्यमयीं सरसां सालंकारां महाभारतीयनल-दमयन्ती-कथाश्रितां हरचरणसरोजाङ्कां सप्तोच्छ्वासां मनोहरां नलचम्पूं व्यरचयाञ्चकार । कीथ[2] - उपाध्याय[3] - गैरोला[4] - बनर्जी[5] - व्यासादय: सर्वेऽपि इतिहासकारा: नलचम्पूं प्रथमचम्पूग्रन्थं त्रिविक्रमभट्टञ्च प्रथमचम्पूकारत्वेन अङ्गीकृतवन्त:। दशमशताब्दे: पुर्वार्धे रचितं नलोपाख्यानाधारितमिदं चम्पूकाव्यं संस्कृतचम्पूकाव्यस्य धारां विंशशतकपर्यन्तमपि सततं प्रवाहितवत्।

प्रवाहानुगुणमेव विद्वत्प्रवरेण श्रीफाल्गुनगोस्वामीद्वारा विरचितं जयभारतादर्श: इति चम्पूकाव्यम् अभिनवसंस्कृतसाहित्यस्य अद्वितीयैतिहासिकं काव्यमस्ति। स्वदेशस्य मातृभूमेश्च कृते प्राणोत्सर्जनाय प्रेरितानां वीराणां गाथाधारिता काव्यरचना राजस्थानस्यास्ति साहित्यिकपरम्परा। तदनुरूपमेव चम्पूकाव्येऽस्मिन् भारतीयवीराणां देशभक्ते: त्यागधनानाञ्च सजीवचित्रणमत्र कविना उपस्थापितम्।

इदमेकं रूपकात्मकं चम्पूकाव्यमस्ति। अस्मिन् तदानीन्तननेतृणां महाभारतीयचरित्राण्युपरि आरोपयन् कवि: स्वप्रबलप्रतिभाया: परिचयमददात्। अत्र अयूबभुट्टोऽऽदीन् दु:शासनादिकौरवपक्षे, अन्यत्र लालबहादूरशास्त्रिप्रभृतीन् युधिष्ठिरादिपाण्डवपक्षे आरोपितवान्। महाभारतसदृशं काव्यमिदं पर्वभि: रचितम्। भारतभूमिगौरवम्, पञ्चशीलम्, षड्ऋतुवर्णनम्, राजनीतिम् - इत्यमून् विषयान् पाण्डित्यपूर्णरीत्या अववर्णत्। भावस्य कलात्मकपक्षस्य च अनुपमसमन्वय: कवेर्कृतौ दर्शनयोग्यो भवति यस्यान्यतममुदाहरणमस्ति जयभारतादर्श: चम्पूकाव्यम्। वीररसप्रधाने काव्येऽस्मिन् अद्भुत-रौद्र-करुणरसा: अपि अङ्गत्वेन विराजन्ते। फिल्लोरा-डोगराई-कारगिलक्षेत्रे संघटितस्य दारुणयुद्धस्य वर्णनं कुर्वता कविना आशारामत्यागी इत्यस्य वीरताया: चित्रणं वीररसेन कृतम्। यथा -

**पाक्यस्तानस्य शौण्डत्वं शमयामीह साम्प्रतम्।**
**पदाहतं करिष्यामि तद्दर्पमवलम्बितम्।।**[6]

ओजोगुणमण्डिता: वीररसोद्रेका: गद्यांशा: अपि अत्यन्तं स्पृहणीया:। कवेर्काव्यिकपाण्डित्यमपि अत्र सम्यक् परिस्फुरति। यथा - **"वीरप्रसो-भारतभुव: शूरा सुप्तकेसरिण इव जाग्रता: घनगर्जसिंहनाद निनादन्त: सांयुगीना विक्रान्ता**

---

[1] संस्कृत साहित्य का समीक्षात्मक इतिहास , आचार्य डा. कपिलदेवद्विवेदी, पृ. 602

[2] The oldest example is probably the Damayanti Katha or Nala Champu of Trivikram Bhatta.- A History of Sanskrit Literature. P-332

[3] संस्कृत साहित्य का इतिहास . पृ 414

[4] संस्कृत साहित्य का इतिहास. पृ 780

[5] Nala Champu also called Damyaanti Katha is the earliest known Champu Kavya. It is by Trivikram Bhatta, and in seven chapters, a small part of epic story of Nala and Damayanti is narrated. It is full of stylistic affectations of laboured composition. - S.C. Banerji- A Companion to Sanskrit Literature. P.255

[6] जयभारतादर्श:,भीष्मपर्व-16, पृ-104

**अभिषेण-परस्य शत्रो रदनानि प्रभंजयन्तः अजेयताभिमानं चूर्णयन्तो राघवस्य लाघवेन पिनाकीव विध्वंसयन्तः शितिकण्ठवरप्राप्तानि दशकण्ठस्य कण्ठानिच्छेयन्त अग्रेसरा बभूव।"**[7]

अष्टादशपर्वसु विरचितस्यास्य चम्पूकाव्यस्य अनुशासननाम्नि पर्वणि फाल्गुनमहोदयः अस्माकं वीराणां गर्वोद्दीपितैः शब्दैः प्रकृतिचित्रणम् अव्यवस्यत् पृथकतया। प्रथमे तेषां वार्तासन्देशैः अनन्तरं भारतीयानां विविधशौर्यपराम्परायाः वर्णनपुरस्सरम्। तद्यथा-**मेजर् यशवन्तसिंहस्य वर्णदूतम् –** महाराष्ट्रनिवासिनः यशवन्तसिंहस्य रणक्षेत्रं प्रति प्रस्थानसमये सिंहनाद एवमासीत् –

**"पञ्चाननगुहाधर्षात् कां गतिं याति वै नरः।**

**द्रक्ष्यत्ययूवो ह्यचिरं मूर्तरूपं समागतम्।।"**[8]

सिंहसदृशानाम् आर्याणां पूण्यभूमौ अनधिकृतदुराचाराणां प्रवेशे का गतिर्भवतीति शत्रूणाम् अधीश्वर अयूब अद्य द्रक्षति। यतोहि शिवाच्छत्रपतेश्चायम् आदेशः सम्प्रवर्तितः यत् महाराष्ट्रियानां करवालः न हि क्वचित् रिपुं मर्षेदिति। समग्रदेशवासिनं प्रति तस्य मर्मच्छेदी अन्तिमवार्ता कवेर्भाषायाम् –

**"सहोदर, रचय मे ह्यारार्तिक्यं शुभावहम्।**

**आगमिष्याम्यहं क्षिप्रं शत्रोः परिभवान्तरम्।।**

**शाश्वतीं भारतीयानां विक्रान्तानां परम्पराम्।**

**रक्षयिष्यामि चाक्षुण्णां यावत्प्राणव्ययं मम।।"**[9]

**वीर-भारतसिंहस्य वर्णदूतम् –** राजस्थानस्य जोधपूरस्य वीलाडाक्षेत्रस्य निवासी वीरः भारतसिंहः रणात् पित्रे सम्प्रेषिते पत्रे तत्रस्थमितिवृत्तं निवेदयित्वा कथयति यत् सुरक्षार्थं मह्यं प्रदत्तः कृपाणः बहुदिनेभ्यः पिपासित अस्ति, परन्तु सम्प्रति लब्धावकाशः पिपासितस्य सुभगचन्द्रहासस्य सन्तोषयितुम् – **"जगदम्बानुकम्पातः पीत्वासृक् परिपन्थिनः।"**[10] सः लिखति अस्मदपेक्षया शत्रवः चतुर्गुणबलेन कैतवाभिक्रमेण आक्रमणं कृतवन्तः। सैन्या अस्माकं पञ्चास्यकल्पाः सुजवेन अभिदुद्रुवुः – **"सर्वं रिपुबलं नीतं पारं निस्त्रिंशरोधसः।"**[11] भारतसिंहः निमाषाभ्यन्तरे शत्रुपक्षस्य एकैकं कृत्वा सप्तटैंकान् अध्वंसत।

**हुतात्मनः वीरस्य आशारामत्यागिनः समाचारः –** मेजर् आशारामत्यागी एकस्मिन् वीरबान्धवपरिवारे जन्म अलभत्। रणे अन्तिमप्राणपर्यन्तं शत्रुभिस्सह युद्धाय समर्थवतः आशारामस्य शौर्यगाथाम् आकर्ण्य परिवारसदस्याः वीरकरुणसंयुक्ताश्रुम्

---

[7] जयभारतादर्शः।

[8] जयभारतादर्शः,अनुशासनपर्व – पृष्ठम्–214

[9] जयभारतादर्शः,अनुशासनपर्व – पृ. 215

[10] जयभारतादर्शः,अनुशासनपर्व – पृ. – 216

[11] जयभारतादर्शः,अनुशासनपर्व – पृ. – 213

ऊढवन्तः। सगुवाछुट्टनसिंहौ तस्य पितृपितामहौ, जननी वासन्ती, अर्धाङ्गिनी कविता एवमेव तस्य स्वसा या प्रयाणकाले भ्रात्रे तिलकविशेषकं ददौ; सर्वेऽपि आशारामस्य पराक्रमेण अभिभूताः धन्याश्च सञ्जाताः। कवेर्भावपूर्णा उक्तिः –

**"भूयः सौरभसम्पृक्ता वासन्ती कुसुमाकरा ।**

**सुश्लोका कविता चाभूत् कवितेव महाकवेः।।**

**आह्लादाश्रुपरिक्लिन्नलोचनाः सर्वबान्धवाः।**

**मन्यमानाः स्वयं धन्यान् स्वजनस्य विचेष्टितैः।।**

**जन्मभूगौरवेणैवानुभूयन्ते स्म गौरवम्।**

**अरातिभंगः परमो वीरैर्लाभो हि मन्यते।।"**[12]

**वीरस्य स्वदयितायै वर्णदूतम् –** रणे शत्रुसंहारणार्थं गच्छतः एकस्य वीरसैनिकस्य पत्निवियोगेऽपि धैर्येण सह भारतमातुः सुरक्षार्थं कृतसङ्कल्पनां वर्णयति कविः स्वीयवाक्यैः –

**"स्वस्त्यस्तु ते प्रसन्नोऽस्मि ह्यनिशं भिन्दन् रनादरेः।**

**स्मृतिस्ते मेऽकथनीयां शक्तिं नित्यं प्रयच्छति।।**

**परिपन्थिसमक्षं मे प्रप्नोत्यास्यचपेटिकाम्।**

**प्रतिश्रुतां मया ते तु स्वाभिलाषामपूरयम्।।"**[13]

वीरः स्वदयितामुद्दिश्य कथयति यावत्पर्यन्तं देहेऽस्मिन् कणमात्रमपि शोणितम् अवशिष्येत तावत्पर्यन्तं सपत्नानाम् उच्छेदं करिष्यामीति सुनिश्चितम्। स्वमानं पृष्ठतः कृत्वा गौरवं तव पालयाम्यहम्। वीराः कदापि रणे पृष्ठं न प्रयच्छन्ति। जन्मभूम्याः जयघोषं 'जयभारत-जयभारत' इति कृत्वा अहर्निशं वैजयन्तीं वराम्यहम्।

**मातृवल्लभस्य वीरकृष्णसिंहस्य सन्देशः –** भारतीयसैन्यस्य वीरनायकः मेजर् कृष्णसिंहः रणाङ्गणात् मातरं प्रति पत्रं सम्प्रेष्य लिखति – हे वीराङ्गने जनयित्रि साम्प्रतम् स्वाश्वता भव। तवादेशः संख्ये मया पालितः परिपूर्णतः। भूमातुः पादपङ्कजस्य रजसः पदवीं प्राप्तये देवि यथाबलं यतिष्येऽहम्। जनयित्रि त्वदंशोऽहं विक्रान्तायाश्च पुत्रः, तव स्तन्यस्य सम्मानं रथाङ्गणे प्रतिस्थापयिष्यामि। मम देहावसानेऽपि दैवी पदवी प्राप्ता भवति यतोहि असूनां हानिः युद्धे अमरत्वं प्रददाति – **'तवात्मजो मृतो नास्ति सोऽमरोऽमरकीर्तिमान्'**[14]**।**

**ज्ञातकीर्तेरज्ञातनाम्नो वीरस्य सन्देशः -** काव्यनिर्माणसन्दर्भे कविः प्रकृतयुद्धस्य विभिन्नविषयान् सम्यक् पर्यालोच्य काव्यमरचयत्। तदा कस्यचित् अज्ञातवीरस्य पत्रं कविनानुसन्धाय काव्ये वर्णितम्। वीरस्य शब्देन कवेर्वर्णनम् – मातृभूम्याः

---

[12] जयभारतादर्शः,अनुशासनपर्व – पृ. – 220

[13] जयभारतादर्शः,अनुशासनपर्व – पृ–221

[14] जयभारतादर्शः,अनुशासनपर्व – पृ.–223

सम्मानरक्षानिमित्तं वयं घोरे युद्धस्थले स्मः। रिपोः शिक्षानिमित्तम् अस्माकं सर्वेषामपि एकमेव लक्ष्यमस्ति। वीरः कथयति सपत्नोः नः विनाशविषये अहं विश्वस्तोऽस्मि, किन्तु सम्प्रति गृहे निवसन्त्योः स्वसुः मातुश्च विषये चिन्ताग्रस्तः अस्मीति। वयं लक्षपुत्राः रताः युद्धे शत्रोरुन्मूलनेऽधुना, अतः हे मम स्वदेशबान्धवाः समाश्वासयन्तु ते उभे धर्मनिष्ठिते। अन्ते तयोरपि वीरत्वं वर्णयित्वा कथयति –

**माता मे वीरललना श्वसा वीराङ्गना तथा ।**

**आत्मीयोऽहं तयोर्नूनं न स्यां रणपराङ्मुखम्।।**[15]

**वीरसुखवीरसिंहस्य पत्रम् –** वीरः सुखवीरसिंहः पितृचरणेषु नमोवाचं वितीर्य कथयति रणोत्सवेऽस्मिन् कुशलोऽस्मि अहम्। शौर्यस्य निकषोपलः वीराणामद्य वर्तते। सुवर्णस्य परीक्षा यथा ज्वलने तथैव युयूत्सानां मृधे। तत्रभवतामसृक् शुद्धं मम देहे शिरोपशिरासु प्रवहति। यत् किञ्चिद् तत्रभवता उपदिष्टोऽहं पुरा गृहे तत्सर्वं हृत्पटले मम वर्तते दृढाङ्कितम्। नाऽहं तादृशं किञ्चित्करिष्यामि यत्स्याद् ब्रीडास्पदं कुले। समज्ञाम् अवश्यमेव लप्स्येऽहम् उभयतः विजये वा दिवङ्गते। क्षणेऽस्मिन् वयं वीरपुत्राः भूमात्रा आमन्त्रिताः स्मः। अत्र अस्माकं सिंहानां निवहः अरिषु प्रादुद्रवत् सद्यश्च छित्वा ज्वलनप्राचीरं स्थलं चाध्यकरोत्।

परन्तु समरेऽस्मिन् अनन्तरं सुखवीरसिंहासौ सूर्यमण्डलं विभिद्य वीरगतिं प्राप्नोत्, विजयञ्च पुरस्कृत्य पृष्ठे यश अतनोत्।

**भारतस्य शौर्यपरम्परा -** शाश्वती ख्याता भारतस्य शौर्यपरम्परा। सा अद्यावधि समायाता समयेनाप्यवाधिता। प्रागैतिहासिककालेऽपि आर्याः विविधसमये दस्यून् न्यषूदयन्। यथा श्रीरामः निशाचरान्हत्वा सुजनान्पर्यपालयत्। रामानुजोऽपि दुर्धर्षान् कौणपान् निजघान। इन्द्रजित्कुम्भकर्णौ तौ दुर्दान्तौ राक्षसाधिपौ बर्हितौ। राघवाभ्यां दशास्यश्च नाराचैः सकुलो हतः। पाण्डवाः कौरवाश्च सर्वेऽपि शौर्यवीर्यविशारदाः आसन्। परन्तु वीरः कृष्णसमः न कश्चित् भूतो न भविष्यति। इतिवृत्तस्य युगस्यापि पूर्वार्द्धे चन्द्रगुप्तादयः नृपाः बभूवुः। अद्वितीयः अशोकोऽसौ यश्च अजातशत्रुनाम्ना विश्रुतः। शोकहर्त्रा तेन रणशान्त्योः उभयोः अवस्थयोः शोभालङ्कृता। एवं मौर्य-गुप्त-भोज-यादवेषु चक्रवर्तिनः सम्राजः सञ्जाताः। पुरा एतैः आर्यैः सुदुरपूर्वेऽपि चक्रं सस्थापितम्। चालुक्याः, राष्ट्रकूट-चह्वाणा-पेशवा- भौंसला-सिन्धिया-डोग्रा-गोर्खा-जाटाः विक्रान्ताः सर्वेऽपि रणकुशलाः प्रसिद्धाः अभवन्। एवमेतेषां वीराणां गणना नैव कर्तुं शक्यते किं तस्य वर्णनम्। कानिचिदुदाहरणानि प्रस्तुयन्ते यथाग्रन्थम् –

चित्रकूटे अकबरस्य प्रत्याक्रमणे तत्र भग्नस्याः सुरक्षाभित्तेः पुनर्निमाणकाले जयमलः अग्न्यास्त्रेण खञ्जः सञ्जातः। रणोपस्थितः कल्ला तं स्वकन्धे स्वीकृत्य करवालेण शत्रूणां संहारं कृतवान्। यथा –

**"चित्रकूटावरुद्धेऽपि खाडो जयमलोऽभवत्।**

**विक्रान्तोऽसावमुं वीरं कल्लाश्चोवाह तद्रणे।।**

**चतुर्वाहुः स निस्त्रिशै रुण्डमुण्ड-समाकुले।**

---

15 जयभारतादर्शः,अनुशासनपर्व – पृ.–225

**कृते क्षेत्रे जयमल्लो गतो वीरगतिं ततः।।**

**कबन्धश्चाभवत् कल्ला अग्रे हि प्रचचाल सः।**

**स्वं ग्रामं वीरसंस्थानं गत्वाप सहधर्मिणाम्।।**

**वाचा दत्ता ह्यनूढा सा प्रेत्याभूत्सहगामिनी।।"**[16]

एवं वीरेषु अग्रगण्यौ सहिष्णू परमस्वतन्त्रौ महाराणाप्रतापः छत्रपतिश्च बभूवतुः। स्वतन्त्रराष्ट्रनिर्माणे तौ वीरौ तत्परौ अभूताम् इति जगत्प्रसिद्धम्, अतः विज्ञेषु एतयोः सविस्तारवर्णनम् अनावश्यकमिति।

स्वचन्द्रहासस्य विश्रुतत्वात् धनी पराक्रमी पद्मसिंहः मरणासन्नोऽपि युद्धक्षेत्रे स्वात्मरुधिरैः मृत्पिण्डं निर्मितवान्। क्षेणानुरक्तिः वीरस्य मन्येऽहं कारणं ततः।

एवं नैकाः वीराङ्गनाः यशस्विन्यः शस्त्रभृतां वरिष्ठाः स्वमातृभूमेः रक्षणाय सर्वस्वं न्यवेदयन् –

**"आक्रम्य शत्रोः पृतना रुरोध झांसी-गढामण्डल-तित्रकूटम्।**

**लक्ष्मीश्च दुर्गावति-कर्मवत्यौ संरक्षितुं ताः प्रतियुद्धतत्पराः।।"**[17]

भूमौ अस्यां पशवः अपि शूरवीराः सञ्जाताः। यथोक्तं कविना –

**"अस्यामवन्यां पशवोऽपि शूराश्चैतक्य-हूंजादि तुरंगमास्ते।**

**एडाश्च गा अन्यमृगा इहस्थाः शौर्यप्लुता व्याघ्रवृकैरजेयाः।।"**[18]

सन्दर्भग्रन्थसूची


1. जयभारतादर्शः, गोस्वामिफाल्गुनभट्टविरचितः, आदर्श मुद्रणालय, तेलीवाडा मार्ग, बाकानेर।
2. संस्कृत साहित्य का समीक्षात्मक इतिहास,डा. कपिलदेव द्विवेदी,वाराणसी।
3. काव्यप्रकाशः, मम्मटाचार्यविरचितः, डा. श्रीनिवासशास्त्रिणा सम्पादितः, साहित्यभण्डार, सुभाष बाजार, मेरठ।
4. साहित्यदर्पण, विश्वनाथविरचित, चौखम्बा विद्याभवन, वाराणसी।
5. संस्कृत साहित्य का इतिहास, बलदेव उपाध्याय, शारदा मंदिर, वाराणसी, 1969।
6. A History of Sanskrit Literature, A.B.Keith, Oxford University Press, Amem House, London,E.C4.
7. A Companion to Sanskrit Literature, Suresh Chandra Banerjee, मोतीलाल बनारसीदास पब्लिशस् प्रा. लि., 2016.


[16] जयभारतादर्शः,अनुशासनपर्व,भारतस्य शौर्यपरम्परा– 13–15

[17] जयभारतादर्शः,अनुशासनपर्व –27

[18] जयभारतादर्शः,अनुशासनपर्व – 23